राजनि०। ६यूथ्यां शब्दच०। संज्ञायां कन्। जीवनिका हरितक्याम् राजनि०।

**जीवनीय** न० जीव–बा० करणे अनीयर्। १जले हेमच०। २जीवन्तीवृक्षे स्त्री अमरः। कर्मणि अनीयर्। ३उपजीव्ये त्रि०। भावे अनीयर्। वर्त्तनीये। ४विद्याशिल्पमित्यादिमनुव्याख्यायाम्। "एभिर्दशभिरापदि जीवनीयम्" कुल्लू क०।

**जीवनीयगण** पु० औषधभेदे "अष्टवर्गश्च पर्णिन्यौ जीवन्ती मधुकं तथा। जीवनीयगणः प्रोक्तो जीवनन्तु पुनस्तथा" वैद्यकम्। [राजनि०

**जीवनेत्री** स्त्री जीवं नयति नी–तृच् ङीप्। सैंहल्याम्।

**जीवनौषध** न० जीवनस्य म्रियमाणप्राणस्य रक्षणार्थमौषधम्। जीवातौ म्रियमाणस्य प्राणरक्षके औषधे अमरः।

**जीवन्त** पु० जीव–कर्त्तरि झ। १प्राणे, २आयुर्विशिष्टे त्रि०। जीव–णिच्–झ। ३औषधे च उणा०।

**जीवन्तिका** स्त्री जीव–जीव–णिच्–वा झ–संज्ञायां कन्। १वन्दायां वृक्षोपरिजातलतायां २गुडूच्यां ३जीवाख्यशाके मेदि० ४जीवन्त्यां ६हरीतक्यां च राजनि०।

**जीवन्ती** स्त्री जीव–झ गौरा० ङीष्। (जीवइ) ख्याते (जियाता) ख्याते १वृक्षे। "जीवन्ती शीतला स्वादुः स्निग्धा दोषत्रयापहा। रसायना बलकरी चक्षुष्या ग्राहिणी लघुः। जीवन्त्याः कोमलं पत्रं छिन्नं तक्रसुभर्ज्जितम्। हिङ्गुना संयुते तैले तक्रं क्षिप्त्वा प्रलेहयेत्" भावप्र०। "कशरेणाथ जीवन्त्या हविष्येण च सर्वशः" भा० स० ४अ०। (चोड़ी) ख्याते गुर्जरदेशप्रसिद्धे २लताभेदे ३शम्यां ४गुडूच्यां ५वन्दायां ६डोड्यां ७हरितक्याम् राजनि०। सा च "हरितकी जीवन्ती स्वर्णवर्णिनी" इत्युक्तलक्षणा।

**जीवन्त्याद्यघृत** न०चक्रदत्तोक्ते पक्वघृतभेदे "जीवन्तीं मधुकं द्राक्षां फलानि कुटजस्य च। शठीं पुष्करमूलञ्च व्याघ्रीं गोक्षुरकं बलाम्। नीलोत्पलं चामलकीं त्रायमाणां दुरालभाम्। पिप्पलीञ्च समं पिष्ट्वा घृतं वैद्यो विपाचयेत्। एतद्व्याधिसमूहस्य रोगे शस्तमुदाहृतम्। रूपमेकादशविधं सर्पिरग्र्यं व्यपोहति"।

**जीवन्मुक्त** त्रि०जीवन्नेव मुक्तः जीवत्येवात्मज्ञानेन बन्धरहिते "जीवन्मुक्तो नाम स्वस्वरूपाखण्डब्रह्मज्ञानेन तदज्ञानबाधनद्वारा स्वस्वरूपाखण्डब्रह्मणि साक्षात्कृते अज्ञानकार्यसञ्चितकर्मसंशयविपर्ययादीनामपि बाधितत्वादखिलबन्धरहितो ब्रह्मनिष्ठ" इति वेदान्तसा०। ननु जीवन्मुक्तो व्यवहरति न वा। आद्ये तस्य बद्धाद्विलक्षणता, द्वितीये देहस्यानुपयोगात् सद्यः पातप्रसङ्ग इत्यत आह। "अयन्तु व्युत्थानसमये मांसशोणितमूत्रपुरीषादिभाजनेन शरीरेण आन्ध्यमान्द्यापटुत्वादिभाजनेनेन्द्रियग्रामेण अशनायापिपासाशोकमोहादिभाजनेन चान्तःकरणेन पूर्वपूर्ववासनया क्रियमाणानि कर्माणि भुज्यमानानि ज्ञानाविरुद्धान्यारब्धफलानि च पश्यन्नपि बाधितत्वात् परमार्थतो न पश्यतीति" वे०सा०। दृष्टान्तेनोक्तमर्थं स्पष्टयति। "यथेन्द्रजालमिति ज्ञानवान् तदिदमिन्द्रजालं पश्यन्नपि परमार्थमिदमिति" न पश्यति। उक्तञ्च "सुषुप्तिवज्जाग्रति यो न पश्यति द्वयन्तु पश्यन्नपि चाऽद्वयत्वतः। तथा च कुर्वन्नपि निष्क्रियश्च यः स आत्मविन्नान्य इतीह निश्चयः" इति वेदान्तसा०। "वेदविद्याव्रतं ज्ञानं देशिकस्य मुखात् स्वयम्। गृहीत्वाष्टोत्तरशतं ये पठन्ति द्विजोत्तमाः। प्रारब्धक्षयपर्य्यन्तं जीवन्मुक्ता भवन्ति ते" तन्त्रम्। अष्टोत्तरशतमुपनिषदाम्। २कौलिके च "धन्या माहेश्वराः स्वार्थप्रत्यभिज्ञानशालिनः। स्वपरिज्ञानमात्रेण जीवन्मुक्ता भवन्ति हि। महामन्त्रप्रभावेण कुलाचारप्रभावतः। स्वेच्छाचारा निर्विकल्पा जीवन्मुक्ता हि कौलिकाः" तन्त्रशास्त्रम् "योऽन्तर्व्योमवदत्यच्छः स जीवन्मुक्त उच्यते" कुलार्णवे।

वेदान्तपरिभाषायां विशेष उक्तो यथा।

"निर्गुणब्रह्मसाक्षात्कारवतस्तु न लोकान्तरगमनं "न तस्य प्राणा उत्क्रामन्तीति श्रुतेः किन्तु यावत्प्रारब्धकर्मक्षयं सुखदुःखे अनुभूय पश्चादपवृज्यते। ननु "क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे" इत्यादिश्रुत्या "ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुतेऽर्जुनेत्यादि" स्मृत्या च ज्ञानस्य सकलकर्मक्षयहेतुत्वनिश्चये सति प्रारब्धकर्मावस्थानमनुपपन्नमिति चेन्न तस्य "तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्ये" कैवल्येनेत्यादि" श्रुत्या "नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपीत्यादि" स्मृत्या च उत्पादितकार्य्यककर्मव्यतिरिक्तानां सञ्चितकर्म्मणामेव ज्ञानविनाश्यत्वावगमात्। सञ्चितं द्विविधं सुकृतं दुष्कृतञ्च। तथाच श्रुतिः "तस्य पुत्रादायमुपयन्ति सुहृदः साधुकृत्यां द्विषन्तः पापकृत्यामिति"। ननु ब्रह्मज्ञानान्मूलाज्ञाननिवृत्तौ तत्कार्य्यप्रारब्धकर्म्मणोऽपि निवृत्तेः कथं ज्ञानिनां देहधारणमुपपद्यत इति चेन्न अप्रतिबद्धज्ञानस्यैवाज्ञाननिवर्त्तकतया प्रारब्धकर्म्मरूपप्रतिबन्धकदशायामज्ञाननिवृत्ते-